३० र्हपत्याद्दक्षिणाग्निमाहरामि। कात्यायनसूत्रे एवमस्ति। प्रतिक्रमोद्धरणं अग्रसंगात्। वितानस्योत्तर
तस्तिष्ठन्नुपतिष्ठते। अग्नेयं वो अयं नो अस्मिन्नेन मंत्रेण अयं। असमाहृते। तथा चैव समीक्षणमितिसू
30 त्रात्। ततः आहवनीयं गत्वा पश्चात्प्राङ्मुखः स्थितः। आगमवृत्रहंतममित्यादिना आहवनीयं उप
तिष्ठते। ततउपविश्य पतृणानां विद्यमानां अपपयनं कृत्वा ततः समिदाधानं। एवं सर्वेषु कुंडेषु। अयमग्निः
पुरीष्य इत्यादिना अन्वाहार्यपचनं उपतिष्ठते। आहवनीयपश्चाद्देन्तरेण प्रविश्य उत्तरस्थित उपतिष्ठते।
अयमग्निर्गृहपतिरित्यादिना गार्हपत्यमुपतिष्ठते। येन मार्गेण पूर्वं गतः तेनैव मार्गेण गत्वा उत्सृजति।
अथ गृह्यमग्निमुपतिष्ठते। गृहान्समीक्ष्य गृहा मा बिभीतेत्यादिभिर्मंत्रैः। अनुपस्थाय प्रविशेत्। ततः रम
अयं नो अग्निर्भगवानित्यादिना गृह्यमग्निमुपस्थाय कल्याणीं वाचं ब्रूयात्। विराजो दोहोसि इत्यादि पा ३०

द्यं। प्रातिरक्ष्णाति। प्रवासार्थमुपस्थाने हृते सति प्रोष्याश्च प्रोष्यापं वा इत्यादि स वति चेति प्रवर्ग्योक्तं।
वसथ्य २ सभ्यावसथ्योरुपस्थानं स्यान्नास्ति। अस्माकं स्वत्रकारेण न स्मार्त्तित्वात्। तपोनीमादिनगृहीतं स्वत्रका
रेण। अध्वर्युवशान्नैवा अग्नी भवतः। तथा बौधायनमतः। अन्वाग्नी आदधाति सभ्यं वावसथ्यं वे
ति। तथापि येषां तेत्ताग्नय एव दृश्यन्ते। तेषां ओपासने नैवाग्न्याधेयोत्पत्तिः। तस्माद्दोपासनं गतं इति
मत्वा दर्शपूर्णमासदेवताभ्यः स्थालीपाको होमो नास्ति। एवं वाग्नयः केचन कुर्वन्ति। कि मन्त्रो नयो
उ४ मूलं। नयमप्याचरन्तो दृश्यन्ते। दर्शपूर्णमासदेवताभ्योपथा विभागं स्थालीपाकं श्रपयित्वेति। अ
नाहिताग्निर्विषयमिति। तेषामकुर्वतां बह्विकासायनाः सर्वे कुर्वन्ति तदप्याचरन्तो मूलं। वा
स्तोष्पतीयं कर्मापापावरणं प्रतिपन्नो भवति। न केवलं। गृहान्निष्क्रामतो यजमानस्य। किं तर्हि।
दृशाराज्ञाइच्छ प्रविष्टेषु मानुषेषु। ततो अस्मदीयं कर्मः। अग्निष्ठस्य अग्नसो दक्षिणेनानुद्रुह्य प्रक्रेस

स्वत्र० व्येपोक्तं पर्याहृत्य उपोह्य स्वीवरं विन्नमित्यर्थः। अग्निष्टक्तानेचात्मीय कृत्वा वास्तोष्पते प्रतिजानीहीति
३१ पुरोनुवाक्या। वास्तोष्पते शग्मयेति याज्या। एतावदेव कर्माङ्गोपांगं कृतं निवृत्तिः। कृते च अन्नं नाहितं त्यजे
त्॥ यत्र पात्रान्य हुते। नित्यहोमस्य तेषां चतुर्दश्यां च वर्हीना निसृष्टं कुर्यात् ते सहविः। एकासमिद्ग
31 हुते भोक्तुं मासाय कल्पते। एवं गार्हपत्ये च दक्षिणाग्नौ च जुहुयात्॥ ब॥ समारोपम उच्यते॥ ॥ ते
५ ने र्थमाहवनीयं उद्धृत्य दक्षिणाग्नौ॥ समारोपार्थं गार्हपत्यादाहवनीयमुद्धरामि। न दक्षिणाग्निं। गा
र्हपत्ये पाणी प्रतितप्य प्राणान् संमृशाति। के पुनः प्राणाः। नासिका मुखं च चक्षुषी श्रोत्रमिति। एहि
मे प्राणना रोहेत्यनेन सकृत्। ततः पुनः पाणी प्रतितप्य तूष्णीं क्रमेण संस्पृशेत्। ततः पुनः प्रतित
प्य तूष्णीं क्रमेण संमृशेत्। ततः पुनः प्रतितप्य एहि मे प्राणना रोहेति मंत्रेण प्राणान् संमृशेत्। ततः राम
द्विवारं तूष्णीं। एवं सकृन्मंत्रेण द्विर्द्विस्तूष्णीमित्यभ्यासार्थः। प्रतपनादि सर्वत्र। एवं षट्कृत्वः। एवमे ३१

स ८२

वाहवनीये पिष्टं कृत्वा। अयं ते योनिरित्विय इति वा आरणीयुगपत्। सकृत् सकृन् मंत्रेण द्विर्द्विस्तूष्णीं। एवं षड्
कृत्वः। एवमेवाहवनीयेपि। नित्यधन आहवनीयस्तु अन्यस्मिन्नरणि भांडे समारोप्यैः। अनुक्तामिते मंथ
नं। इतरथा पुनराधानं भवति। उद्धरणं पृथगरणिपक्षे पृथक् मंथनं। ततो विहारः प्रातः पुरोदयानु मं
थनं। इतरथा पुनराधानं। प्राणसमारोपे तु उपावरोहे सनेन उद्धासमरण्योः प्राग्निप्यमंथनं कुर्यात्। पृ
थगरणिपक्षे तु पृथगुपावरोहणं। अथवा लौकिके वाग्नौ उपावरोहेत्। ततः होमं। ततः प्राणे धारण्योर्वा
तमग्निं समारोप्य। अस्मिन् पक्षे यद्यसमारोपितोग्निरनुगतः। पुनर्हि पुनराधानं भवति। एवं सर्वत्र न्यायः।
कुशलैः सर्वं निरूपणीयं॥ ॥इति श्रीआश्वलायनसूत्रपद्धतौ कौषीतकिमतानुरक्तमलयदेवेनोद्धृता
स्मार्तरातिधानविरचितायां वृत्तौ तृतीयोध्यायः॥ ॥समाप्तः॥ ॥संस्थितायां पौर्णमास्यां। इंद्राय विमृधे
ष्टिं कुर्यात्। अनुनिर्वाप्यसंज्ञिकेष्टिः। पौर्णमासीकर्मानंतरं तत्र आवाहनं। अग्निमग्न आवह। सोम

स्त्र० मावह। इंद्रंविमृधमावह। देवांआज्यपांइत्यपो इत्यादि। उन्नमेप्रयाजे। स्वाहाग्निं। स्वाहासोमं स्वाहेंद्रंविमृ
३२ धंस्वाहादेवाइत्यादि। वृधन्वंता वाज्यभागौ। इंद्रत्वमसि वामभोजइति प्रधानस्य पुरोनुवाक्या। येइयजा
महइंद्रं विमृधं मृगो नभीमः कुचरइतियाज्या। स्विष्टकृतः। अग्निं जुष्टोदमूना अतिथिरिति पुरोनुवाक्या।
32 येइयजामहेग्निं स्विष्टकृतमयाग्सोमस्यप्रिया० लिंद्रस्य विमृधःप्रिया० देवानामित्यादि। अग्नेशर्धमहत
इतियाज्या। स्त्रक्कवाके। अग्निर्हविर०कृत। सोमोहर०कृत। इंद्रोमृधोह्वविः२०कृतादेवाइत्यादि॥ ॥अ
अमावास्याकर्मनिंतरं अदितेष्टिः। आवाहनं। अग्निमग्नआवह। सोममावह। अदितिमावह। देवांआ
ज्यपांइत्यादि। उन्नमेप्रयाजे। स्वाहाग्निं स्वाहासोमं। स्वाहादितिं। स्वाहादेवाइत्यादि। वार्त्रघ्नावाज्यभागौ।
प्रधानस्य। उतत्वामदितिमहीति पुरोनुवाक्या। येइयजामहेमहीमूषुमातरमिति याज्या। जुष्टोदमूना अति राम
थिः। स्विष्टकृतः पुरोनुवाक्या। येइयजामहेग्निं स्विष्टकृमयालग्निरग्नेःप्रिया०सोमस्यप्रियाअदित्याः ३२

प्रियाण्देवानामित्यादि। अग्नेइडइमहतइतियाज्या।स्वक्कवाके। अग्निरिदंविरक्लतासोमोहविरण्कत। अदि
तिरिदंविरण्कत। देवाइत्यादि।यूदिशारब्देयावुक्तविकत्वव्यं। अनागतेपर्वणिअमास्यत्रश्त्रेमुदितेतिष्कि
त्र्व्याजःनांनिविषयं।प्रायश्चित्तमेतत्। इष्टंत्रया दर्शपूर्णमासप्रवसत्वेक्लते नवतिचतुर्दशिपापर्वसंभवान्नवति।
ग्रन्थ४ ब्राह्मभाष्यक्कारेणप्रतिपादितमिति। अग्निरूवाधानादिभिर्नांसाक्कतंचेत्। ततःपश्चाद्यदेकमत्र्वं। तत्र
आवाहनं। अग्निमग्नआवह। सोममावह। अग्निंदातारमावह। इन्द्रंप्रदातारमावह। विष्णुंशिपिविष्टमा
वह। देवाइत्यादि। उत्तमेप्रयाजेस्वाहाअग्निं। स्वाहासोमं। स्वाहाग्निंदातारं। स्वाहेंद्रंप्रदातारं। स्वाहाग्निवि
ष्णुंशिपिविष्टं। स्वाहादेवाइत्यादि। रथवंतावाज्यभागौ। प्रधानस्य। अग्नेदादाश्वेषरयिमितिपुरोनुवा
क्या। पेउयजामहेग्निंदातारंहानोअग्नेइहहतोदाम्रइम्निएइतियाज्या। सहस्वातेशतावयगवांपुरोनुवा
क्या। येउयजामहइन्द्रंप्रदातारंमात्नमाअंनरमाक्षिश्रेतसरिक्षार्द्याज्या। किमित्तेविष्णोपरीतिपुरोनुवाक्या।

स्मृ० प० ये३यजामहे विष्णुं शिपिविष्टं वषट् इति विष्णोरिति याज्या। नित्यः स्विष्टकृतः। अयालग्निरग्नेः प्रिया० सो

३३ मस्य प्रिया० लग्नेर्दत्त्वः प्रिया० लिंद्रस्य प्रहातुः प्रियाधमानि विष्णोः शिपिविष्टस्य प्रिया० देवाना

मित्यादि। धेनुश्चत्रीन्द्र दक्षिणा। तत्रमजापत्य पत्वेति प्रतिग्रह मंत्रः। कोदादितिसनुपस्य शातीसूक्तं।

सूक्तवाके। अग्निर्हरि० कृत। सोमो हवि० कृत। अग्निदत्तिनार हवि० कृत। इंद्रप्रदाता हवि० कृत।

33 विष्णुः शिपिविष्टो हवि० कृतादेवाइत्यादि। यदि निर्वपेत्कृते चंद्रदर्शनं साधु हश्चावामागृहे मा

ता। अमावास्या देवानां परिस्सज्य एतासामेव दातानां अग्निहोत्रादीनां विसृजेत। इमेवब्री हियो अग्नप

दात्र इत्येवमादि निरुलीकृतांश्चपुल्लिंगात्। आवाहनेकृ नि समति देवतापनयः कार्यः। आज्येनावाहि राम

तायजे दिसत्रन भवति। अग्निदात्रादीनां योगः कर्तव्यः। श्रितानामपि विभागः। तानेव विनिर्देशात्। ३३

असान्नाय्येति दधिपयसोन। तावेव चतुरोलाङ्गाविभागः। एकस्मिंश्चकृते शेषदेवतापनयः। पयो

भावेसर्वप्रायश्चित्तंकृत्वासमाप्य।अमावास्येनसहपौर्णिमेष्टिवियोगश्चेत्कालात्पौर्णमासंअमा
वास्यंवर्त्ततअग्नीनामएणपनौदिप्रकृतस्ययथाविहितंकर्त्तव्यं।ततःस्विष्टकृतेपिविशेषः।अग्नेनयसुपथे
तिपुरोनुवाक्या।आदेवानामपिपंथेतियाज्या।तैत्तिरीयाणांअमावास्यावेतअमावास्यांअग्नयेएक
हविः।अग्नयेदानेदध्येकंइन्द्रायप्रदानेअग्नीषोमीयस्यमिश्रंपयः।एकंसामान्यात्।विलापसामान्यात्।
विष्णुशिपिविष्टकालेवामावास्यांइन्द्रायप्रदानेअग्नीषोमीयमिश्रंयथोक्तयथाविहितमित्यर्थः।पौ
र्णमासस्यकालक्रियायांपुनःकालक्रियाप्राङ्निर्वपनंपौर्णमास्याममावास्यायांकालप्रवृत्तिः।।
तस्मिन्नेवविहारेद्वावेषाइष्टिःक्रियते।मैत्रायणीयानांनपुनःअमावास्यायांपिंडपितृयज्ञः।तिथिनि
मित्तत्वात्वृद्धिस्यात्।गृह्यसूत्रप्राप्तवृत्तिःअतएवयस्मात्।अकालेकृतानिकर्माणिनिःसानिपुनःस्वका
लेकार्याणि।।अतीतेपर्वण्यमावास्याप्रकृतेकर्मणिअमुष्टेष्टिःकर्त्तव्याः।। ।।८।।एतदपिप्राया

सत्र० श्चिन्नविषयंमन्त्रांतिवक्षेनवर्सोपभावेद्वितीयायामौपवथ्यंकृतंवेद् । तथाचनचतुर्दश्यांमुपवसथेदिति
३ध निषेधात् । नदर्थंप्रायश्चित्तं । अन्यत्राप्यकालेमायश्चित्तविषयेनभवतीतिब्राह्मणभाष्यकारेणव्या
ख्यातं । नत्रयोदश्यांमुपवसेन्नसप्तदश्यांमिति । निबोधेनान्यत्र । तत्रच्चावाहनं । अग्निमग्नआव
34 ह । सोममावह । अग्निंपथिकृतमावह । इंद्रंवृत्रहणमावह । वैश्वानरमावह । देवांइसादि । उत्तमेप्रया
जे । स्वाहाग्निं । स्वाहासोमं । स्वाहाग्निंपथिकृतं । स्वाहेंद्रंवृत्रहणं । स्वाहावैश्वानरं । स्वाहादेवांइसा
छा३ दि । वृधन्वंतावाज्यभागौ । प्रधानस्य । वेष्यांश्चो हि वेषो अध्वनइतिपुरोनुवाक्या । येऽयजामहेऽग्निंपथि
कृतमा देवानामपिपंथामगन्म इतियाज्या । वार्त्रहत्यायशवसइतिपुरोनुवाक्या । येऽयजामहइंद्रंवृत्रह
णंसहद्दानुंपुरुहूतक्षियंतमिति याज्या । ऋतावानंवैश्वानरमितिपुरोनुवाक्या । येऽयजामहेवैश्वानरं राम
नाग्निंयज्ञानांसदनमितियाज्या । निष्पन्निष्टकृतः । येऽयजामहेग्निंस्विष्टकृतमयाळग्निरग्नेःप्रियाऽमो ३ध

मस्सप्रियाः । अग्नेः पथिकृतः प्रियाः । इंद्रस्य वृत्रघ्नः प्रियाः । वैश्वानरस्य प्रियाः । देवानामित्यादि । इडोपा
नहे इडित्विण । तत्र प्रजापतये त्वेति प्रतिग्रहमंत्रः । कोदाहित्सुपस्थज्ञाति । ब्रह्म होता च । इतरयोर्यथावेदं ।
सूक्तवाके । अग्निर्हविर०कृत । सोमो हविर० । अग्निः पथिकृद्धविर०कृत । इंद्रो वृत्रहा हविर०कृत । वैश्वा
नरो हविरकृत । देवा इत्यादि । अमावास्याकर्मयथावन्नतो भवति । एवमनुइष्टानामेवेष्टिः ॥ ॥ अस्मि
न्नवसरे अग्नावग्नावद्वैसुत इसे वृमाद्यात्प्रायश्चित्तेष्टयः सूत्रकारेण सूत्रिताः । तासां यथावत्प्रपो
गो लिख्यते । अग्नौ विद्यमाने लौकिकेनाध्वासा तत्रोध्धृते चेदेषाइति । अग्नयेऽग्निमते । अ इत्यादि
ष्टस्विष्टकृतिर्वाकर्तव्या । आवाहनं । अग्निमग्न आवाह । सोममावह । अग्निमग्निमंतमावह । देवाँ इत्या
दि । वार्त्रघ्नावाज्यभागौ । प्रधानस्य । अग्निमग्निं हुवेमसतिभिरितिपुरोनुवाक्या । येऽ३यजामहेऽग्निमग्निमंत
मग्निनाग्निः समिध्यते याज्या । स्विष्टकृतः । येऽ३यजामहेऽग्निं स्विष्टकृतमयाळग्निरग्नेः प्रियाः । सो

स्वत्र० ममस्य प्रिया॰ त्वग्नेःरग्निमतः प्रिया॰ देवानामित्यादि।यथाभागमरहिणा।अवाहार्येचेत्।सूक्तवाके।
३५ अग्निरिदं हविर॰ कृत।सोमोहविर॰कृत।अग्निरग्निमानिदं हविर॰कृत।अत्रशंयोः सर्वं ऊतिः।अग्नयेग्नि
मतेस्वाहेति।विहृतानामग्नीनांचकोविवसंतरागमनेपथिकृतेष्टिः कर्त्तव्या।नियतानितिपक्षेवा।अधिप
35 ठितइत्यर्थः।आवाहनं।अग्निमग्नआवह।सोममावह।अग्निंपथिकृतमावह।देवांइत्यादि।उक्तमेव
याजोस्वाहाग्निं।स्वाहासोमं।स्वाहाअग्निंपथिकृतंस्वाहादेवाइत्यादि।वार्त्रघ्नावाज्यभागौ।प्रधानस्य।
वेत्थाहिवेधोअध्वन।इतिपुरोनुवाक्या।येऽयजामहेग्निंपथिकृतमादेवानामपिपंथामगन्मेतियाज्या।
नित्यस्विष्टकृतः।अयाडग्निरग्नेःप्रिया॰सोमस्यप्रिया॰त्वग्नेःपथिकृतःप्रिया॰देवानामित्यादि।अ राम
वाहार्येदक्षिणा।सूक्तवाके।अग्निरिदं विर॰कृत।सोमोहर॰कृत।अग्निःपथिकृत्हविरकृत।देवा ३५
इत्यादि।अत्रापिशंयोः सर्वमूतिः।अग्नयेपथिकृतेस्वाहेति।एतदग्निहोत्रदर्शपूर्णमासचातुर्मा

स्मुपञ्चौ सौत्रामण्यां सोमे वीतरागमने भवति। स्वकीयाग्निपरस्परं मिथः संसर्गो वीतयेष्टिर्भवति। प
राग्निसंसर्गेपि भवति। आवाहनं। अग्निमग्न आवह। सोममावह। अग्निं वीतमावह। देवाँ इत्यादि। उत्त
मे प्रयाजे। स्वाहाग्निं स्वाहा सोमं। स्वाहाग्निं वीतिं। स्वाहा देवाँ इत्यादि। वार्त्रघ्नावाज्यभागौ। प्रधानस्य। अ
ग्न आयाहि वीतय इति पुरोनुवाक्या। ये३ यजामहेऽग्निं वीतिं यो अग्निं देववीतये हविष्मानिति याज्या। नि
त्ययाज्यानि स स्विष्टकृतः। ये३ यजामहेऽग्निं स्विष्टकृतमयाळग्निरग्नेः प्रिया० सोमस्य प्रिया० ऽग्नेर्वीते
प्रिया० देवानामित्यादि। अन्वाहार्यो दक्षिणा। स्रुक्रवाके। अग्निर्हविर०कृत। सोमो हविर०कृत। अ
वीतिर्हविर०कृत। देवा इत्यादि। क्षसजूतिर्वा। अग्नये वीतये स्वाहेति याम्या अग्निसंसर्गे च परिगृहीते विव
यविविवच्छित्तिः। आवह। सोममावह। अग्निं विविचिमावह। देवाँ इत्यादि। उत्तमे प्रयाजे। स्वाहाग्निं स्वाहा सो
मं। स्वाहाग्निं विविचिं। स्वाहा देवाँ इत्यादि। वार्त्रघ्नावाज्यभागौ। प्रधानस्य। कपालो। अग्ने विवस्वः सुदृक्ति

आवाहनं। अग्निमग्न २

सूत्र० मिति। पुरोनुवाक्या। ये ३ यजामहे ग्निं विविविंत्वा मग्ने मानुषीरीलते विश इति याज्या। निसास्विष्ट
३६ कृतः। ये ३ यजामहे ग्निं स्विष्टकृतमयालग्निरग्नेः प्रिया० सोमस्य प्रिया० लग्ने विविविचेः प्रिया० दे
वानामित्यादि। अन्वाहार्ये दक्षिणा। स्तकवाके। अग्निर्हविरं० कृत। सोमो हविरं० कृत। अग्निर्वि
36 विचिर्हविरं० कृत। देवा इत्यादि। समाप्तिर्वा। अग्नये विचिचये स्वाहेति। हवाग्निरएपाग्निः स्तमि
मसर्गेसिं वर्गायेष्टिः। आवाहनं। अग्निमग्न आवह। सोममावह। अग्निं संवर्गमावह। देवां इत्यादि।।
उत्तमे प्रयाजे। स्वाहाग्निं स्वाहा सोमं। स्वाहाग्निं संवर्गं स्वाहा देवा इत्यादि। वार्त्रघ्नावाज्यभागौ। प्रथ
नस्य। कुविदङ्ग नो मिग विष्टय इति पुरोनुवाक्या। ये ३ यजामहे ग्निं संवर्गं मानो अस्मिन्महाधन इति।
याज्या। निसास्विष्टकृतः। ये ३ यजामहे ग्निं स्विष्टकृतमयालग्निरग्नेः प्रिया० सोमस्य प्रिया० लग्नेः एम
संवर्गस्य प्रिया० देवानामित्यादि। अन्वाहार्ये दक्षिणा। स्तकवाके। अग्निर्हविरकृत। सोमो हविर० ३६

कृत। अग्निः संवर्गो हविरकृता देवा इत्यादि। इस्मिड्ुतिर्वा॥ अग्नये संवर्गाय स्वाहेति। यदिश्मन्नाना
ग्निःसंसर्गेति अग्नये शुचये इष्टिः कर्त्तव्या। आवाहनं। अग्निमग्न इदं आवह। सोममावह। अग्निंशुचि
मावह। देवां इत्यादि। उन्नमे प्रयाजे। स्वाहा अग्निं। स्वाहा सोमं। स्वाहा अग्निंशुचिं स्वाहा देवा इत्यादि
वार्त्रघ्नावाज्यभागौ। प्रधानस्य अग्निः शुचिव्रततम इति पुरोनुवाक्या। ये यजामहे ग्निंशुचिं समुदग्नेश्व
चयस्तव इति याज्या। नित्यस्विष्टकृतः। ये यजामहे ग्निं स्विष्टकृतमयाडग्निरग्नेः प्रिया॰ सोमस्य प्रिया॰
तग्नेः शुचेः प्रिया देवानामित्यादि। अन्वाहार्यो दक्षिणा। सूक्तवाके। अग्निर्हविर॰कृता सोमाइ
विर॰कृता। अग्निः शुचिर्हविरकृता देवा इत्यादि। इस्मिड्ुतिर्वा। अग्नये शुचये स्वाहेति। विष्णुनाग्नि
संसर्गेऽग्नये अप्सुमते इष्टिः कर्त्तव्या। आवाहनं। अग्निमग्न आवह॥ सोममावह। अग्निमप्सुमंतमावह॥
देवां इत्यादि। उन्नमे प्रयाजे। स्वाहा अग्निं स्वाहा सोमं स्वाहाग्निमप्सुमंतं स्वाहा देवा इत्यादि। वार्त्रघ्ना

स्त्र० ३७

वाज्यभागौ। प्रधानस्याग्नयेस्वग्ने। सघिष्ट वेति पुरोनुवाक्या। येऽ३यजामहेऽग्निमग्नुमंतमुरोगम हां
अनिबाधेववर्द्धेतियाज्या। निसस्विष्टकृतः। येयजामहेऽग्निंस्विष्टकृतमयालग्निरग्नेः प्रिया०सो
मस्यप्रिया०लग्नेरग्नुमतः प्रिया०देवानामित्यादि। अन्वाहार्यदक्षिणा। सूक्तवाके। अग्निरिदं हवि०
कृत। सोमोहविरं०कृत। अग्निरग्नुमानिदं हवि०कृत। देवाइत्यादि। सस्कृतिर्वा अग्नये ग्नुमते
स्वाहेति। व्याधीनांमारंभेरुद्रायेष्टिः कर्तव्या। गांवाधुकमयः पशुस्सुरः। अयज्ञो। हिमपावा।
पुरोडाशेणचरुर्वेति अध्वर्यवे विशेषः। आवाहनं। अग्निमम आवह। सोममावह। रुद्रमावह। दे
वांइत्यादि। उत्तमे प्रयाजे। स्वाहाग्निंस्वाहासोमं। स्वाहारुद्रंस्वाहादेवाइत्यादि। इषं वेंता वाज्य रामं
भागौ। प्रधानस्य। कद्रुद्रायेतिपुरोनुवाक्या। येऽ३यजामहे। रुद्रमग्नामंतेसुमदिति देवयज्येतिया ३७
ज्या। निसस्विष्टकृतः। येऽ३यजामहेऽग्निंस्विष्टकृतमयालग्निरग्नेः प्रिया०सोमस्यप्रिया०रुद्रस्यप्रिया०

देवानामित्यादि। अन्वाहार्यो दक्षिणा। सूक्तवाके। अग्निमग्न आवह। सोम० हविरं० कृत। सोमो हविरं०
कृत। रुद्रो हविरं० कृत। देवा इत्यादि। प्रकरणादेन दृष्ट्वैवं यावस्त्वं चितं। दीर्घमध्वानं गमिष्यन् सूक्ते पथि
कृत इष्टिं कुर्यात्। आवाहनं। अग्निमग्न आवह। सोममावह। अग्निं पथिकृतमावह। देवा इत्यादि।
उत्तमे प्रयाजे। स्वाहाग्निं स्वाहा सोमं। स्वाहा सोमं स्वाहा अग्निं पथिकृतं। स्वाहा देवा इत्यादि। वार्त्र
घ्नावाज्यभागौ। प्रधानस्य। वयमु त्वा पथस्पत इति पुरोनुवाक्या। ये३ यजामहे अग्निं पथिकृतं पथ
स्पथः परिपतिं याज्या। नित्यस्विष्टकृतः। ये३ यजामहे अग्निं स्विष्टकृतम् अयाळग्निरग्नेः प्रिया० अग्नेः प
थिकृतः प्रिया० देवानामित्यादि। सितं वासो दक्षिणा बृहस्पतये त्वेति प्रतिग्रहणमंत्रः। क्रोडादिस
नुमंत्रणं। सूक्तवाके। अग्निर्हविरं० कृत। सोमो हविरं० कृत। अग्निः पथिकृद्धविरं० कृत। देवा इत्या
दि। प्रतिनिर्दिष्टोपस्थानेष्टिरिति प्रसिद्धा समाप्ताः।। कामं प्रतिष्ठा अग्नये कामायेष्टिः कर्तव्या।

स्त्र० आवाहनं। अग्निमग्न आवह। सोममावह। अग्निं काममावह। देवां इत्यादि। उत्तमे प्रयाजे। स्वाहाग्निं स्वा
३८ हा सोमं स्वाहाग्निं कामं स्वाहा देवां इत्यादि। वार्त्रघ्नौ कामयुक्तौ आज्यभागौ। प्रधानस्य। अग्निः परेषु
धामसु इति कल्पजात्सु रेनुवाक्या। ये ३ यजामहेऽग्निं काम मत्पाम तं काम मग्ने तवोती इति याज्या॥ निम
38 स्विष्टकृतः। ये ३ यजामहेऽग्निं स्विष्टकृतम याळग्नि रग्नेः प्रिया धामा०। सोमा०। प्रिया०। लग्ने कामस्य प्रि
या० देवानामित्यादि। श्रीकामायां। कामो विराजो स्विष्टकृतः। अग्ने वृषभो धेनुर्दक्षिणा। यमायत्वे
ति प्रतिग्रहमंत्रः। रुद्राय त्वेति धेनुः। को दादित्यनुमंत्रणं। सूक्तवाके। अग्निर्हविर०कृत। सोमो ह
विर०कृत। अग्निः कामो हविर०कृत। देवा इत्यादि। व्रतवेलां प्रोष्य। अव्रत्यं चाचरित्वा। उपवसथ्ये
हवोऽग्नेः सः श्वः कृति। तस्मिन्नत्यागतस्य यजनीये ह्नि व्रतपती इष्टिः कर्तव्या॥ अव्रत्यकरणेति। मै राम
थुनादिकृतेत्यर्थः। उपवसथे हनि। आवाहनं। अग्निमग्न आवह। सोममावह। अग्निं व्रतपति ३८

मावह ।। देवां इत्यादि । उत्तमे प्रयाजे । स्वाहाग्निं स्वाहा सोमं स्वाहाग्निं व्रतपतिं स्वाहा देवा इ
त्यादि । वार्त्रघ्ना वाज्यभागौ । प्रधानस्य । त्वमग्ने व्रतपा असीति पुरोनुवाक्या । ये३ यजामहे ग्निं व्र
तपतिं यद्वो वयं प्रमिनाम व्रतानीति याज्या । निसस्विष्टकृतः । ये३ यजामहे ग्निं स्विष्टकृतमयाल
ग्निरग्नेः प्रिया० सोमस्य प्रिया० त्वग्नेर्व्रतपतेः प्रिया० देवानामित्यादि । अन्वाहार्यो दक्षिणा । स्व
क्तवाके । अग्निर्हविर० कृत । सोमो हविरकृत । अग्निर्व्रतपतिर्हविरकृत । देवा इत्यादि । व्रसेहं
न्यवभ्रस्यागतमरण निमित्त अश्रुपाते कृते यजनीयेह्नि व्रतभृते ष्टिः कर्त्तव्या । अग्निमग्न आव
ह । सोममावह । अग्निं व्रतभृतमावह । देवां इत्यादि । उत्तमे प्रयाजे । स्वाहाग्निं । स्वाहा सोमं । स्वाहा
ग्निं व्रतभृतं स्वाहा देवा इत्यादि । वार्त्रघ्ना वाज्यभागौ । प्रधानस्य । त्वमग्ने व्रतभृच्छुचिरिति कल्पजा पु
रोनुवाक्या । ये३ यजामहे ग्निं व्रतभृतं व्रतानि बिभ्रद् व्रतपा इति कल्पजा याज्या । निसस्विष्टकृतः । अ

स्त्र०
३९
39

ग्निं स्विष्टकृतमयाल ग्निरग्नेः प्रिया० सोमस्य प्रिया० लग्नेर्व्रतभृतः प्रिया० देवानामित्यादि। अन्वाहा
र्यदक्षिणा। सूक्तवाके। अग्निरिदं हविर० कृत। सोमो हविर० कृत। अग्निर्व्रतभृद्धविर० कृत। देवा इत्या
दि।। ।। गृहदाहे अग्नये क्षामवतेष्टिः कर्तव्या। एकदेशदग्धेपि भवति। आवाहनं। अग्निमग्न आवह।
सोममावह। अग्निं क्षामवन्तमावह। देवां इत्यादि। उत्तमे प्रयाजे। स्वाहाग्निं स्वाहा सोमं स्वाहाग्निं क्षा
मवन्तं स्वाहा देवा इत्यादि। वार्त्रघ्नावाज्यभागौ। प्रधानस्यालक्ष्मारजोसिपञ्चन इति पुरोनुवाक्या। ये३
यजामहे अग्निं क्षामवन्तं स्वेवस्तु निर्वद्भुर्वणी कक्षेन रीति याज्या। निर्ऽस्विष्टकृतः। ये३ यजामहे ग्निं स्विष्ट
कृतमालग्निरग्नेः प्रिया धामानि० सोमस्य प्रि० लग्नेः क्षामवतः प्रिया० देवानामित्यादि। अन्वाहार्यो
दक्षिणा। सूक्तवाके। अग्निरिदं हविर० कृत। सोमो हविर० कृत। अग्निः क्षामवान् हविर० कृत। देवा इत्या
दि।। पत्न्याः एकस्मिन् गर्भे द्विप्रभृतिजनने नमरुत्स्य इष्टिः कर्तव्या। आवाहनं। अग्निमग्न आवह। सोमममा राम ३९

वह । मरुतश्चावह । देवां इत्यादि । अत्र मे प्रयाजो । स्वाहा अग्निं स्वाहा सोमं स्वाहा मरुतः स्वाहा देवाईत्यादि ।
वार्त्रघ्नावाज्यभागौ । प्रधानस्य । मरुतस्त्वेषसंदृशा आयातयामा । विश्व । शुभ्रा हिरण्यखादयो । कल्पजासु
रोऽनुवाक्या । ये३ यजामहे मरुतो वाता त्विषो मरुतो वर्षनिर्णिज इति याज्या । श्रियेकं वो अधितनुषु वाशीति
वा । नित्यास्विष्टकृन्नः । ये३ यजामहे अग्निं स्विष्टकृतमयाडग्निरग्नेः प्रिया॰ सोमस्य प्रि॰ मरुतां प्रि॰ देवाना
मित्यादि । अन्वाहार्यो दक्षिणा । सूक्तवाके । अग्निर्हविरं॰ कृत । सोमो हविरं॰ कृत । मरुतो हविरजुषन्त
वीवृधन्त॰ कृत । देव्या इत्यादि । अत्र भी प्राकारेण विशेष उक्तः । कुमारीकुमारजनेन स्वस्तिताविक
ल्प इति । अग्निहेम्नायपणीयां तु सर्वेषां स्थाने स सर्जिति स्त्र देवस्या । अनाहिताग्नि । निसनैमित्ति
ककाम्यानां स्थाने स्थालीपाकः कर्त्तव्यः । प्रायश्चित्ते न अर्थलोपेन सर्वजुतिः । अथवा प्रायश्चित्तेष्टी
नां कां स्थाने स्थाली देवताये सर्वजातिद्दति प्येति समानं अस्त्रक्को त्विष्टप्रहुतः । अतंतमत्राक्किरस्ति

त१ व१

सूत्र० चेत्सूत्रकृद्धृतिः। नान्यथा। येनकेनोपायेन इष्टिरेव कर्तव्या। तथैव शिष्टाचारः। ज्ञातीनां परस्परं सं
६० देहे सामाधनस्यैवेयमिष्टिः। सपिण्डैः सह कर्तव्याः। ऋत्विजश्च मेत एव। आवाहनं। अग्निमग्न आवह। सो
ममावह। अग्निं वसुमन्तं। सोमं रुद्रवन्तं। मिन्द्रं मरुत्वन्तं। वरुणमादित्यवन्तमावह। देवां इत्यादि। अत्र मेमया
50 जा। स्वाहाग्निं स्वाहा सोमं स्वाहाग्निं वसुमन्तं। सोमं रुद्रवन्तं। इन्द्रं मरुत्वन्तं। वरुणमादित्यवन्तं स्वाहा देवा
इत्यादि वार्यध्वा वाजभागो। प्रधानस्य। अग्निः प्रथमो वसुभिर्नो अव्यादिति कल्पजा पुरोनुवाक्या। ये३ यजा
महेग्निं वसुमन्तं सोमं रुद्रवन्तं इन्द्रं मरुत्वन्तं वरुणमादित्यवन्तं समग्निर्वसुभिर्नो अव्यादिति कल्पजा याज्या।
अत्र प्रधानानन्तरं सर्वेष्टिगतयः प्रायश्चित्ता उपविष्टा। संज्ञानमुशानावृहदिति सूक्तं जपेयुः। स्वार्थमेवात
तः नित्यस्विष्टकृतः। ये३ यजामहेग्निं स्विष्टकृतमयाळग्निरग्नेः प्रिया० सोमस्य प्रिया० लग्ने वसुमतः सोम एम
स्य रुद्रवतः लिन्द्रस्य मरुत्वतो वरुणस्यादित्यवतः प्रिया देवानामित्यादि। अवाहार्यो दक्षिणा। अन्यद ६०

६१

न१ पिकिं विद्वान्तव्यं । प्रयोजन्महत्वात् । स्वकवाके । अग्निर्हविरंकृत । सोमो हविरंकृत । अग्निर्वसुमान् । सो
मो रुद्रवान् । इंद्रो मरुत्वान् । वरुण आदित्यवान् हविरजुषंतावीवृधंत महोऽकृत । देवा इत्यादि । अयमसा
धमति । अग्निहोत्रायणी नोक्तम्कृतिः कर्तव्या । मित्रविंदा मित्रादिकामेष्टिः । प्रायश्चित्तमस्याने वा कर्तव्या ॥
पंचदश सामिधेन्यः । सइस्वंवा । अन्येषां दशस्विनां । पंचप्रयाजाः । केषांचिद् इडाप्रयाजाः । तत्र इडामत्वष्टा
न्यस्य वेत् वौषट् । याज्या वदादेश इति वचनात् । यथा संप्रेषितं वा इति पक्षांतरं । तत्र आवाहनं । अग्निम
ग्न आवह । सोममावह । अग्निं सोमं वरुणं मित्रमिंद्रं बृहस्पतिं सवितारं पूषणं सरस्वतीं त्वष्टारमावह । दे
वा इत्यादि । उत्तमे प्रयाजे । स्वाहाग्निं । स्वाहा सोमं । स्वाहाग्निं सोमं वरुणं मित्रमिंद्रं बृहस्पतिं सवितारं पूष
णं सरस्वतीं त्वष्टारं स्वाहा देवा इत्यादि । अष्टिमेनावाज्यभागौ । अग्निना रयिं गयस्फान इति । प्रधानस्य । अ
ग्निः सोमो वरुणो मित्र इंद्रो बृहस्पतिः सविता यः सहस्री । पूषा नो गोभिरवसा सरस्वती त्वष्टा रूपाणि सम

स्त्र० ४२ र नक्लिय यक्षेदिति कल्पजानुवाक्या । ये३यजामहे त्वष्टारं सरस्वतीं पूषणं सवितारं बृहस्पतिं इंद्रं मित्रं वरुणं सोममग्
ग्निं । त्वष्टा रूपाणि दधती सरस्वती पूषा भगं सविता मे ददातु । बृहस्पतिर्ददिन्द्रो बलं मे मित्रः क्षत्रं वरुणः सो
मो अग्निरिति कल्पजा याज्या । ततः स्विष्टकृतः अग्ने नो रास्व सहस्वदिति पुरोनुवाक्या । ये३यजामहेग्निं स्विष्टकृ
तमयाडग्निरग्नेः प्रिया० सोमस्य प्रिया० त्वष्टुः सोमस्य वरुणस्य मित्रस्येन्द्रस्य बृहस्पतेः सवितुः पूष्णः सरस्वत्यास्त्व
ष्टुः प्रिया० देवानामित्यादि । उत नो ब्रह्मन्नविष इति याज्या । अत दक्षिणा सहस्रं गाव इति विशेषात् । सह
स्रमिति सर्वास्माकं सिद्धांतः । काम्यत्वाद्दक्षिणा महती कर्तव्या । केचिदाचार्या वाजपेयमिति नागा । विनिपापहनने
स्वपामपर्याप्तिः । यस्मात्काम्यफलसिद्धिरिति यद्देशाधर्मपदं दक्षाप्रयाजान्कुर्वन्ति । अनुयाजाश्च दशालवंती
ति न यथाकर्तव्यं । सूक्तवाके । अग्निरिदं हविर०क्रुत । सोमो हविर०क्रुत । अग्निः सोमो वरुणो मित्र इन्द्रो बृहस्पतिः । राम
सविता पूषा सरस्वती० त्वष्टा इदं हविरजुषतावीवृधन्तक्रत । देवा इत्यादि ॥ मित्रविंदा समाप्ता ॥ ॥ अथ दीक्षि ४२

तायनानामिष्टीर्वक्ष्यामः। तेषामाद्या निषट्। इष्टिः पौर्णमासकार्ये भवति। तेषां फाल्गुन्यां पौर्णमास्यां प्र
योगः। वसिष्ठस्याकं प्रस्थाप्य पौर्णि फाल्गुन्याममावास्यायां यावज्जीवं प्रानि दिनं संवत्सरं वा एकैकं यथा
क्रमेण कुर्यात्। दाक्षायणयज्ञस्य विधिं वक्ष्यामः। पूर्वस्यां फाल्गुनपौर्णमास्यां यथाविहितं कुर्यात्। अ
थवा एकं हविर्वा। अग्नीषोमीयपुरोडाशः। उत्तरस्यां पौर्णमास्यां आग्नेयं। ऐन्द्रं च अमावास्याविकारः।
पंचदश पञ्च परपक्षे हवींषि तन्त्रं मितसादि यथाविहितं। प्रातः फाल्गुन्याममावास्यायां ऐन्द्राग्नः अमा
वास्याविकारः। अपराह्ने पिंडपितृयज्ञः। उत्तरस्यामाग्नेयं मैत्रावरुणी पयस्या पंचदश। आवाहनं। अ
ग्निमग्न आवह। सोममावह। अग्निमावह। मित्रावरुणमावह। देवां इत्यादि। उत्तममुपयाजे। स्वाहाग्निं। स्वाहा
सोमं। स्वाहाग्निं स्वाहा मित्रावरुणौ। स्वाहा देवा आज्यपा जुषाणाः स्वाहा। वाजिनो अग्न आज्यस्य हविषो
व्यन्तु वौषट्। इध्म वर्त्ता वाज्यभागौ। आग्नेयस्य। अग्निर्मूर्धा भुवो यज्ञस्येति याज्यानुवाक्ये। एतेन याहृता

सू३० वृधेतिपुरोनुवाक्या।येऽ३यजामहे।मित्रावरुणान्तुनवांश्चित्तुमद्यास्वंधइतियाज्या।निस्वष्टकृ
ध२ तः।येऽ३यजामहेग्निंस्विष्टकृतमयालग्निरग्नेःप्रिया०सोमस्यप्रिया०ऽग्नेःप्रिया०मित्रावरुणयोः
प्रिया०देवानामित्यादि।अन्वाहार्यदक्षिणा।सूक्तवाके।अग्निर्हविर०कृत।सोमोहवि०रकृत।अ
५२ अग्निर्हविर०कृत।मित्रावरुणौहविर०जुषेतांमवीवृधेतां०कातां।देवाइत्यादि।अग्निर्होत्रेणकृ
ता।वाजिनोदेवाहविजोषयिष्यंतेवर्धयिष्यंतेमहोज्यायःकरिष्यंते।अत्रभाष्यकारेणवाजिनोदेवा
२४ इतिदेवशब्दस्यःकर्तव्यः।अस्यामृधत्रेवायामित्यादि।ततोवाजिनयागः।अग्नेर्नुवंतुवाजिन इतिपु
रोनुवाक्या।येऽ३यजामहेवाजिनोवाजेवाजेवतवाजिनोनइतिवषट्कृतासनोऽनवानेनयजति।उपवि
ऊपअनुवषट्कारः।ततोवाजिनोवाभक्षः।यजमानोब्रह्माहोताध्वर्युःआग्नीध्रश्चसमुह्यभक्षयं एम
तायन्मेरेतः०प्रभवतीतिमंत्रेण।ततःशेषयोर्वाकांतेकेषांचिद्दध्युःपूर्णंवाजिनयागःषतनःपत्नीसं ध२

याजादिसमानं। दाक्षायणयज्ञस्य सांवत्सरिके अहः प्रयोगविधिं वक्ष्यामः। फाल्गुन्यां पौर्णमास्यां सर्व
स्यां अग्नीषोमीयपुरोडाशः। उत्तरस्यां पौर्णमास्यां आग्नेयः ऐन्द्रं नु ऐन्द्राग्नश्च। अमावास्याविकारः। तती
यस्यां आग्नेयः मैत्रावरुणी। एवं अहरहः सांवत्सरे अन्तेहनि मैत्रावरुणी पयस्यैव। दाक्षायणयज्ञः समा
मः। इलादधस्य विधिर्वक्ष्यामः। फाल्गुन्यां पौर्णमास्यां सर्वस्मिन्पर्वद्वये पात न्नआवाहनं। अग्निमग्न आव
ह। सोममावह। अग्निमावह। सरस्वतीमावह। देवां आज्यपां इत्यादि। उत्तमे प्रयाजे। स्वाहाग्निं। स्वाहा सोमं।
स्वाहाग्निं। स्वाहा सरस्वतीं स्वाहा देवां इत्यादि। वार्त्रघ्नावाज्यभागौ। आग्नेयस्य प्राकृते याज्यानुवाक्ये। अ
ग्निर्मूर्धा भुवो यज्ञस्येति। पावका नः सरस्वती पुरोनुवाक्या। ये३ यजामहे सरस्वतीमिमा जुह्वाना युष्म
दिति याज्या। नित्यस्विष्टकृतः। ये३ यजामहे अग्निं स्विष्टकृतमयाडग्निरग्नेः प्रिया० सोमस्य प्रिया० अग्नेः प्रि
या० सरस्वत्याः प्रिया० देवानामित्यादि। अग्निर्हविरं०कृत। सोमो हविरं०कृत०। अग्निर्हविरं०कृत स

सूत्र० ४३
५३

रस्वती हविरंकृता। देवा इत्यादि॥ अत्र स्यां फाल्गुन्यां पौर्णमास्यां त्रिहविः। आवाहनं। अग्निमग्न आ
वह। सोममावह। अग्नीषोमौ उपांशु। आवह। अग्नीषोमावह। इन्द्रमावह। देवा इत्यादि। अत्र मे प्र
याजे। स्वाहाग्निं। स्वाहा। सोमं स्वाह। अग्नीषोमौ उपांशु। स्वाहाग्नीषोमौ स्वाहेन्द्रं स्वाहा। देवा इत्यादि।
वृधन्वं। तावाज्यभागौ। प्रधानस्य। अग्नीषोमाविमं सु मे इत्युरोनुवाक्या। ये३ यजामहेग्नीषोमौ जुषा
एणाग्नीषोमावितियाज्या उपांशु। अग्नीषोमा य स वेदसा इत्युरोनुवाक्या। ये३ यजामहेग्नीषोमौ युवमे
तानी। तिर्द्वयाज्या। ऐन्द्रसानसिरयिं इत्युरोनुवाक्या। ये३ यजामह इन्द्रं प्रससाहि षइतियाज्या। निसस्विष्टकृ
तः। ये३ यजामहे इग्निं स्विष्टकृतम यालाग्निरग्नेः प्रिया धामाम स्य प्रिया० अग्नीषोमयोः उपांशु। प्रिया०
लग्नीषोमयोः प्रिया० लिन्द्रस्य प्रिया० देवानामित्यादि। सूक्तवाके। अग्निर्हविरंकृत सोमो हविरं०
कृ। अग्नीषोमौ उपांशु हविरजुषेतां० क्रातां। अग्नीषोमौ हविरजुषेतां० क्रातां। इन्द्रो हविरंकृता। दे

राम ४३

वाआज्यपाइत्यादि॥ ॥फाल्गुन्याममावस्यायां॥ ॥आवाहनं। अग्निमग्न आवह। सोममावह। अग्नि
मावह। सरस्वंतमावह। देवांइत्यादि। उत्तमेप्रयाजे। स्वाहाग्निं। स्वाहासोमं। स्वाहाग्निं। स्वाहासरस्वंतं।
स्वाहादेवांइत्यादि। दधवंतावाज्यभागो। अग्निर्मूर्द्धापुरोनुवाक्या। ये३यजामहेग्निंभुवोयज्ञस्येतिया
ज्या। जनीयंतोन्वग्रवःपुरोनुवाक्या। ये३यजामहेसरस्वंतसवाहृधेनयेइतियाज्या। निसास्विष्टकृतः।
ये३यजामहेग्निंस्विष्टकृतमयाळग्निरग्नेः प्रिया॰ सोमस्यप्रिया॰ ळग्नेः प्रिया॰ सरस्वतः प्रिया॰ देवाना
मिद्रंइत्यादि। सूक्तवाके॥ अग्निर्हविरकृत। सोमोहविरकृत। अग्निर्हविरकृत। सरस्वान्हविरकृत। देवा
इत्यादि। अपराह्णे पिंडपितृयज्ञःकर्तव्यः। उत्तरस्याममावास्यायां॥ ॥आवाहनं। अग्निमग्नमावह।
सोममावह। इंद्राग्नीमावह। मित्रावरुणावावह। देवांइत्यादि। उत्तमेप्रयाजे। स्वाहाग्निंस्वाहासोमं।
स्वाहेंद्राग्नी। स्वाहामित्रावरुणौस्वाहादेवास्वाहावाजिनाइत्यादि। दधवंतावाज्यभागो। प्रधानस्य।

स्तन्त्र० ४४ इंद्राग्नी अवसा पुरोनुवाक्या। ये३यजामहे इंद्राग्नी प्रवर्षणि प्र इति याज्या। ऋतेन या वृतावृधेति मित्रा
नुवाक्या। ये३यजामहे मित्रावरुणा तु तवां विहु याज्या॥ नित्य स्विष्टकृतः। ये३यजामहे अग्निं स्विष्टमयाल
ग्निरग्नेः प्रिया० सोमस्य प्रिया० लिंद्राग्न्योः प्रिया० मित्रावरुणयोः प्रिया० देवानामित्यादि। सूक्तवाके। अ
55 ग्निर्हविर० कृत। सोमो हविरकृत। इंद्राग्नी हविरजुषेतां० कातां॥ मित्रावरुणौ हविरजुषेतां० कातां। दे
वा आज्यपा इत्यादि। अग्निं होत्रेण कृत। वाजिनो देवा हविर्जोषिषिष्यंत इति। अस्याद्ध्वर्यु होत्रा पामित्या
दि सर्वव्रजमाने। वाजिन प्रयागः। इत्यादर्शः समासः॥ सार्वसेनि पूर्णस्य विवक्ष्यते। उत्तरस्यां फाल्गुना
ममावास्यायां आवाहनं। अग्निमग्न आवह। सोममावह। अग्निमावह। अग्नीषोमौ उपांशु। आवह।
अग्नीषोमावावह। अग्निमावह। विष्णुं उपांशु। आवह। इंद्राग्नी आवह। देवां इत्यादि। अग्नेमेमयाजे। राम
स्वाहाग्निं। स्वाहा सोमं। स्वाहाग्निं स्वाहा अग्नीषोमौ उपांशु। स्वाहाग्निं स्वाहा विष्णुं उपांशु। स्वाहेंद्राग्नी। ४४

स्वाहा देवा इसार्यमेहि। वार्त्रघ्नावाज्यभागौ। प्रधानस्य। अग्निर्मूर्द्धेति पुरोनुवाक्या। ये३यजामहे ग्निंमु
वापक्रस्येति याज्या। अग्नीषोमा विममिति पुरोनुवाक्या। येयजामहे। अग्नीषोमौ जुषाणा वग्नीषो
मोजुषाणा वग्नीषोमाविति याज्या। उपांशु। अग्नीषोमा सवेदसेति पुरोनुवाक्या। ये३यजामहे ग्नी
षोमो पुवमेतानीति याज्या। अर्वं तस्या पुरोनुवाक्या। ये३यजामहे ग्निमस्माकमेधेश्च ध्वरमिति या
ज्या। इदं विष्णुरिति पुरोनुवाक्या। ये३यजामहे। विष्णु वषट्ते विष्णु विति याज्या। उपांशु। इन्द्राग्नी
अवसेति पुरोनुवाक्या। ये३यजामहे इन्द्राग्नी नवर्षणिभ्य इति याज्या। निसामिष्टकृतः। ये३यजामहे
ग्निं स्विष्टकृतम याला ग्नि॰ देवः प्रिया॰ सोमस्य प्रिया॰ लग्ने: प्रिया॰ उपांशु अग्नीषोमयोः। प्रिया॰ लग्नी
षोमयोः प्रिया॰ लग्नेः प्रिया॰ उपांशु विष्णोः प्रिया॰ लिन्द्राग्न्योः प्रिया॰ देवानामिसादि। स्तक्रवाके।
अग्निर्हविर॰कृत। सोमो ह विर॰कृत। अग्निर्हविर॰कृत। उपांशु। अग्नीषोमो ह विर॰जुषेतां॰ कातां।

सूत्र० ४५ अग्निर्हविरकृत। उपांशु। विष्णुः। हविरकृत। इंद्राग्नी सोमौ हविरजुषेतां० कामं। हविरजुषे
तां० क्रातां॥ देवाइत्यादि। नामावास्यायां यजते पिंडपितृयज्ञं करोति। शौनकः यज्ञस्य विधिर्वक्ष्यामः।
प्रकृते षण्मासाभ्यां संवत्सरं यजति। अतिचारकामस्य वसिष्ठयज्ञं वक्ष्यामः। फाल्गुन्याममावा
45 स्यायां। उत्तरस्यां सर्वमेतत्। यथोक्तवत्। अमावास्यां निर्हवींषि सर्वाणि। आवाहनं। अग्निमग्न आव
ह। सोममावह। अग्निमावह। उपांशु। विष्णु आवह। इंद्राग्नी आवह। अग्निमावह। अग्नीषोमौ उ
पांशु आवह। अग्नीषोमावावह। देवा इत्यादि। वार्त्रघ्नावाज्यभागौ॥ निगमस्थाने तु यथावृत्। न
पौर्णमास्यां यजते। साकं प्रस्थाप्यं वक्ष्यामः। फाल्गुन्याममावास्यायां॥ तिस्रो दर्शपूर्णमासौ संव
त्सरं यावज्जीवं वा तत्र विशेषः। साकं संप्रतिष्ठंते। इति साकं इस्मयः। साकं संप्रयजंत इति प्रैषमो। राम
यजमानं अनुब्रूहीति। ततः यजमान पंचमासु गपत् संप्रतिष्ठंते सर्वे यजेयुः। उभा वयास्तु श्रौषट्। ४५

ये३यजामहेग्निं वषट्कारं वसवेग्निः पुनः। साकंभहल्ययं तइति युगपद्दिलाभक्षः॥ ॥इति दर्शपूर्णमा
सायनानि षट्सु अयनेषु। हारियूपपद्धाहारम्भकामक्रियासु दर्शपूर्णमासायनात्वेन व्य
वस्थितानि। पांचदश्यंच सामिधेनीनां षट्सु अयनेषु। मुन्यपनविधिर्वक्ष्यामः॥ ॥पांचदश्यं च फा
ल्गुन्यां पौर्णमास्यां आवाहनं। अग्निमग्न आवह। सोममावह। अग्निमावह। अग्नाविष्णू आवह।
देवां इत्यादि। उक्तमेव प्रयाजो स्वाहाग्निं स्वाहा सोमं। स्वाहाग्निं स्वाहाग्नाविष्णू स्वाहा देवां इत्यादि।
वार्त्रघ्ना वाज्यभागौ। प्रधानस्य। अग्निर्मूर्द्धेति पुरोनुवाक्या। ये३यजामहेग्निं भुवो यज्ञस्येति याज्या।
अग्नाविष्णू महि तद्वां पुरोनुवाक्या। ये३यजामहे अग्नाविष्णू अग्ना। विष्णू महि धामेति याज्या। नि स्व
स्विष्टकृतः। ये३यजामहेग्निं स्विष्टकृतं मयालग्निरग्नेः प्रिया० सोमस्य प्रिया० त्वग्नेः प्रिया० त्वग्नावि
ष्णोः प्रिया० देवानामित्यादि। सूक्तवाके। अग्निर्हविर०कृत। सोमो हविर०कृत। अग्निर्हविर०कृत।

स्त्र०
४६
46

अग्नाविष्णू हविरजुषेतां ऽक्रानां । देवा इत्यादि । एवमहरहः संवत्सरं । न प्रतिपदि नत्रदर्शयिस्मि

सोत्सवतः सुन्त्ययनं समाप्तं ॥ तुरायणयज्ञस्य विधिर्वक्ष्यामः ॥ फाल्गुन्यां पौर्णमास्यां प्रवृत्तिः ॥

वैशाखशुक्लपंचम्यां वाषष्ठ्यां वा कालापनस्य । पंचहवृपां वा । आवाहनं । अग्निमग्न आवह स्तो

ममावह । अग्निमावह । इंद्रमावह । विश्वांदेवानुपांशु आवह । देवां आज्यपां इत्यादि । उक्त

मेभजेया । स्वाहाग्निं । स्वाहा सोमं । स्वाहाग्निं । स्वाहेंद्रं विश्वान्देवा स्वाहा देवा इत्यादि । हृधवंतावा

ज्यभागौ । प्रधानस्य । अग्निर्मूर्द्धेति त्रिष्टुभानुवाक्या । भुवो यज्ञस्येति याज्या । इंद्रं वो विश्वतस्परी । त्रिष्टु

रोनुवाक्या । ये ३ यजामहे इंद्रमादयस्व हरिभिर्मितिरिति याज्या । विश्वेदेवास आगते त्रिष्टुभेनुवा

क्या । ये ३ यजामहे विश्वांदेवान्स्तीर्णं बर्हिषि समिधान इति याज्या । स्विष्टकृतः । ये ३ यजाम

हेग्निं स्विष्टकृतमपात् अग्निरग्नेः प्रिया० सोमस्य प्रिया० अग्नेः प्रिया० इंद्रस्य प्रिया० उ० विश्वेषां

राम
४६

देवानां प्रिया० देवानामित्यादि स्तस्कवाके। अग्निर्हविरं० कृत। सोमो हविष्टुरं० कृता अग्निर्हविरं०
कृता इन्द्रो हविरं० कृत। विश्वे देवाः हविरजुषंता वीवृधंता कृत। देवा इत्यादि। कृत्स्ना जिन्वादि निव
तानि। एवमहरहः संवत्सरं यजते। नमतिपाहि पौर्णमासो संवत्सरंते। अवभृथे हि दूर्वीव्रतं च। अनि
यतो हकं स्वयमेव सोमगानं कुर्यात्। दोषं सोमवत्। सोप्रेगमइष्ट्वा पशुना वा सोमेन वा यागः। का
य्यः। तुरायणयज्ञः समाप्तः॥ ॥ अथाग्रयणविधिं व्याख्यामः॥ सोमीव्रपामाके छित। समसह इत्यासा
मिधेन्यः। आवाहनं। अग्निमग्न आवह। सोममावह। सोममावह। देवां आज्यपां इत्यादि। त्वमेव
याजे। स्वाहाग्निं। स्वाहा सोमं। स्वाहा सोमं। स्वाहा देवा इत्यादि। त्वमग्ने सप्रथाः सोम यास्त इति स
हंतावाज्यभागौ अग्निं जुषाणो अग्निः सोमं जुषाणः सोम इति याज्ये। प्रधानस्य जै। प्र इन्द्रमयज्ञमिदं
वच इति पुरोनुवाक्या। ये उ यजामहे सोमं यातेधमानि हविषीति याज्या। विराजो स्विष्टकृतः। प्रकोव

स्त्र० ग्नेर्दीदिहि ध्रुवेरोनुवाक्या। पेड्यजामहेग्निं स्विष्टकृतमयाळग्निरग्नेः प्रियाः० सोमस्य प्रियाः० सोमस्य प्रि
४७ या० देवानामिन्द्रस्याहि। इमोग्ने वीततमानीति याज्या। मधुपर्को दक्षिणा। प्रजापतये त्वेति प्रतिग्रहमं
त्रः। कोदादित्सनुष्टस्य रचानि। सूक्तवाके। अग्निरिदं हविरकृत। सोमो हविर०कृत। सोमो हविर०कृत। देवा
47 इत्यादि। वेष्टयवी हि एवमेवेष्टिः कर्त्तव्या। पथमाश्यामाकेष्टिः। वर्षासु श्यामाकानामाग्रयणं। श
रदि व्रीहीणामाग्रयणं। वसंते यवानामाग्रयणं। इति शरवंतरेकाले नियमः। अस्माकं कालनि
यमः। सूत्रकारेण न कृतः। अविशेषादेतेष्वेव कालेष्विष्टयः। अनाहिताग्निर्नवं प्राशिष्यं निति
सूत्रस्य हेतोः। आवसथ्याग्नौ स्थालीपाकं ग्न कुर्यात्। व्रीहियवयोराग्रयणं वस्यामः। सामदृश्य पंच
सामिधेनीनां। आवाहनं। अग्निमग्न आवह। सोममावह। इंद्राग्नी आवह। ऊपांशु विश्वान्देवान्। आव राम
हाद्यावापृथिवी ऊपांशु आवह। केचिच्छांदसां द्यावापृथिव्यो इमिपवंति। तदसुरं लोक वेदयोरदर्शना ४७

हा। द्यावापृथिवी इत्येव। प्रथमाद्वितीयाद्विवचनं सर्वाणि। तथा च बौधायनः। द्यावापृथिवीभ्यामिति सूक्त
भ्यामभ्याम्भ्याह। द्यावापृथिवी यजेति वषट्कृते जुहोति। मि। देवांश्चाज्यपा इत्याह इसमानं। त्वन्नोमेमपा
जोस्वाहाग्निं स्वाहा। सोमं स्वाहेन्द्राग्नी स्वाहा। विश्वान्देवान्स्वाहा। द्यावापृथिवी स्वाहा देवा इत्यादि।
संवृन्ताबाज्यभागो। नमस्ते समर्यास्सोम यास्त इति। अथ प्रधानहविषां। इमं वामस्य मन्मन इति पु
रोनुवाक्या। ये३ यजामहे इन्द्राग्नी स्थ विन्नुस्तोमं न०याज्या। विश्वेदेवास आगतेति पुरोनुवाक्या। ये३
यजामहे। विश्वान्देवान्त्स्वैर्बर्हिषीति याज्या। मही द्यौः पृथिवी च न इति पुरोनुवाक्या। ये३ यजाम
हे। द्यावापृथिवी उर्वी पृथ्वी बळ लेरिरेक्षनेइति याज्या। प्रेद्धो अग्न इति स्विष्टकृतः पुरोनुवाक्या।
ये३ यजामहे अग्निं स्विष्टकृत न म याल न्निरग्नेः प्रिया० सोमस्य प्रिया० लिन्द्राग्न्योः प्रिया० विश्वेषां देवा
नां प्रिया० द्यावापृथिव्योः प्रिया० देवानामित्यादि। इमो अग्ने वीततमानीति याज्या। वैश्वदेवयागा

स्मृ० पृथिवीयोनिगर्भमस्थानेषुउपांशुतावक्ष्यः प्रयजोदक्षिणा। कस्मायत्नेतिप्रतियह मेत्रः। कोरहा
५८ दित्यनुमंत्रणं। स्क्षकवाके। अग्निर्हविरकृत। सोमोहविरकृत। इंद्राग्नीहविरजुषेतां। का
ताः देवाआज्यपा इत्यादिकेविद्वर्यवः आग्नेयं प्रथमं कर्वंमि। तत्रआवापेऽग्निमिंधतपुरोनु
58 वाक्या। सुकर्माणः सुरुचइतिपाज्या। एवमेववसंतेयवानामाग्रयणं। अथसमानतंत्रावादर्शे
र्शमासौ। तत्रप्रकृतं। तत्रसामिधेनी। आज्यभागदक्षिणानां दर्शपूर्णमासमेव। तत्रउत्तराएषा
ग्रायणहवींषि। अथयवानवानिधान्यानि अग्निहोत्रैयेवैहत्वातस्मात्पयसासायंप्रातरग्निहो
त्रेयेवैहत्वातस्मात्पयसासायंप्रातरग्निहोत्रंजुहुयात्। आग्रयणानिसमाप्तानि॥ ॥ चातुर्मास्य
नांप्रयोगः कथ्यते। एतानिकर्माणिअल्पभाग्यानिकुर्वंति मोक्षएवफलं॥ ऋतीरित्यनीव राम
कालंदर्शयति। फाल्गुन्यांपौर्णमास्यांप्रयोगः चातुर्मास्यानां। चैत्र्यांवा। चातुर्मास्यानांप्रारं ५८

रंभेमाहुरप्सुजा अप्सुदैकश्राद्धानि। वैश्वानरपार्जन्येष्टिः कर्तव्या। प्रातिपर्वणि एकाहे पाशुकेच। पाशुके
रंभेमाहुरप्सुजा अप्सुदैकश्राद्धानि। वैश्वानरपार्जन्येष्टिः कर्तव्या। प्रातिपर्वणि एकाहे पाशुके च। पाशुके
द्वितीयात्रयात्वैश्वरवी इष्टिर्भवति। एवंपुनः पुनः प्रयोगभवति। नाद्या रंभणीया। अध्वर्युर्ग्रावस्तुयांषड्
सुत्रवा रंभणीया एवं स्त्रनमस्मितेतत्रैवगृहे भवति। अस्माकं दृश्यते स्वमासा रंभते एव सिद्धिः। प्रकृ
तिवद्रंभेसर्वासां विकृतानां प्रारंभणं भवति। नवकप्रपद्य। द्विसप्तदशसामिधेन्यः। आवाहनं। अग्नि
मग्नआवह। सोममावह। वैश्वानरमावह। देवाँ इत्यादि। उत्तमे प्रयाजे। स्वाहाग्निं स्वाहा सोमं स्वाहा
वैश्वानरं स्वाहा पर्जन्यं स्वाहा देवा इत्यादि। वार्त्रघ्नावाज्यभागौ। प्रधानस्य। ऋतावानं वैश्वानरं पुरो
नुवाक्या। ये३यजामहे वैश्वानरं नालियज्ञानां याज्या। पार्जन्याय प्रगायतेति पुरोनुवाक्या। ये३यजा
महे पर्जन्यं यस्य व्रते पृथिवीति याज्या। निसास्विष्टकृतः। ये३यजामहे अग्निं स्विष्टकृतमयालग्निरग्नेः
प्रियाः सोमस्य प्रियाः वैश्वानरस्य प्रियाः पर्जन्यस्य प्रियाः देवानां मितसादि। अन्वाहार्यो दक्षिणा।

स्त्र० सूक्तवाकोऽग्निर्हविरं०क्त । सोमो हविरजुषत । वैश्वानरो हविरं०क्त । पर्जन्यो हविरं०क्त । देवा
ध९ इत्यादि । अथ त्यागाः । इदमग्नये सोमाय वैश्वानराय पर्जन्याय देवेभ्य आज्यपेभ्यः । प्रधानस्य । इदं वै
श्वानराय । इदं पर्जन्याय । स्विष्टकृते । वैश्वानरस्य पर्जन्यस्योज्जितिं० । वैश्वानरः पर्जन्यः स्तमपनुद
५१ तां० सूक्तवाके । इदमग्नये सोमाय वैश्वानराय पर्जन्याय देवे० । ततः ओं योर्वाकादि सकलं यज
जमानं कृत्वा वैश्वदेवपर्वणि प्रतिकरणं कुर्यात् । तत्र प्रयोगः । वैश्वदेवपर्वार्थं गार्हपत्यादाहवनी
श्लि३ यमुद्धरामि । वैश्वदेवपर्वार्थं गार्हपत्याद्दक्षिणाग्निमाहरामि । ततः आग्निवाहनं । व्रतं च एतत्
तस्त्र्वस्यां पौषमास्यां कर्तव्यं । उत्तरस्यां पौषमास्यां वरणं कुर्यात् । गोत्रेऽमुकोऽमुकोऽमुकशर्मा
नूवऽस्य प्रथमजो दाक्षिणेन वैश्वदेवेन पर्वणा हे यक्ष्ये । तत्र मे त्वं ब्रह्मा भव । सर्वेषां । वृद्धामास्ता राम
दितेषु हविष्षु मंथनं । आचम्य । पश्चाद्देरतस्यां प्राग्नये मथ्यमानायेत्युक्त्वा मित्वा देवस ध९

वितः १ त्रिवरीं। मही द्यौः पृथिवी च नः त्वामग्ने पुष्करादधि २ जातायानुब्रूहि। सूक्तं। धनंजयं रणे रणे।
उत ब्रुवन्तु जन्तवः। हस्तेन धार्यमाणाय। धनंजयो रणे रणे। आ यं हस्ते न खादिनं प्रक्रियमाणायानुब्रू
हि। सूक्तः विशणमग्निं स्वध्वरं। प्र देवं देववीतये। आज्याज्जतौ रूयमानायां। आ स्वे योनौ निषीदतु॥
आ जातं जातवेदसि। अग्निनाग्निः समिध्यते २ त्वं ह्यग्ने अग्निना। समिध्यमानाय। तं मर्जयन्त सुक्रतुं।
मिति परिधानीया। ततः एहि होतरित्युक्ते बर्हिर्गत्वा आवस्थ। प्रणीतोत्करोपपद्य। कंपपद्यादि।
समहद्भासामिधेन्यः। आवाहनं। अग्निमग्न आवह। सोममावह। अग्निमावह। सोममावह। स
वितारमुपांशु आवह। सरस्वतीमावह। पूषणमावह। मरुतः स्वतवस आवह। विश्वान्देवान्
उपांशु आवह। द्यावापृथिवी उपांशु आवह। देवाङ्सादि। नव प्रयाजाः। समिधः समिधोऽग्न
यमो वहे आज्यस्य व्यन्तु। चत्वारः। दुरो अग्न आज्यस्य व्यन्तु। उषासानक्ता आज्यस्य वीतां। दैव्या

स्व० होतारं अश्वय आज्यस्य वीतां ।। तिस्रो देवी आज्यस्य व्यंतु ।। येऽयजामहे स्वाहाग्निं स्वाहा सोमं स्वाहाग
५० ग्निं वैश्वानरं स्वाहा सोमं स्वाहा सवितारं उपांशु । स्वाहा सरस्वती । स्वाहा पूषणं । स्वाहा मरुतः स्व
तवसः स्वाहा विश्वान्देवान् स्वाहा द्यावापृथिवी । उपांशु । स्वाहा देवा आज्यपा जुषाणा स्वाहा
वाजिनो अग्न आज्य हविषो व्यंतु । स हूंता वाज्य भागो । प्रधानस्य हविषां याज्यानुवाक्याः
50 अग्निर्मूर्धा भुवो यज्ञस्य तमाहिं मेयस्य इमं यज्ञं । या ते धामानि दिवि ती सोमस्य । हिरण्यपाणिमू
तय उहीरण्य कवितमामिति सावित्रस्य । पावका नः सरस्वती । निभाजुष्का नाघुश्चाहितिसारस्वतस्य
स्वषं तवस्त्रेता शुक्र नेश्वन्यादिति पोष्णस्य । इहेह वः स्वतवसः प्रचित्र मिति मारुतस्य । विश्वेदेवा
स आगतं स्तोमं बर्हिषी ति वैश्वदेवस्य । मही द्यौः पृथिवी । उर्वी पृथ्वी ति द्यावापृथिवीयस्य । एम
विराजो स्विष्टकृतः प्रेषो अयमग्न इति पुरोनुवाक्या ये ऽयजामहे ऽग्निं स्विष्टकृतमयाळग्निरग्नेः प्रिया० ५०

+ सोमस्यप्रिया० सवितुः प्रिया० अग्नेः प्रिया० सरस्वत्याः प्रिया० इन्द्रस्य प्रिया० मरुतां स्वतवसां प्रिया० १

सोमस्यप्रिया० सवितुः प्रिया० अग्नेः प्रिया० विश्वेषां देवानां प्रिया० द्यावापृथिव्योः प्रिया० दे
वानामित्यादि। इमो अग्न इति याज्या। वक्षः प्रथमजो दक्षिणा। अस्यैवैश्वदेवपर्वणः समृद्ध्यर्थे
वक्षः प्रथमजो दक्षिणा। ब्रह्मादिभ्यः ऋत्विग्भ्यः तमहं संप्रददे। रुद्रायत्वेति प्रतिग्रहमंत्रः। को
दादिति अनुमंत्रणं। अत्र स्मृता० न वा अनुयाजाः। देवं बर्हिः। देवी द्वारो वसुवने वसुधेयस्य व्यंतु।
देवी उषासानक्ता वसुवने वसुधेयस्य वीतां। देवी जोष्ट्री वसुवने वसुधेयस्य वीतां। देवी ऊ
र्जाहुती वसुवने वसुधेयस्य वीतां। देवा दैव्या होतारा वसुवने वसुधेयस्य वीतां। देवीस्तिस्र
स्तिस्रो देवीर्वसुवने वसुधेयस्य व्यंतु। देवो नराशंसो० देवो अग्निः स्विष्टकृत्। सूक्तवाको। अ
ग्निर्हविरं०कृत। सोमो हविरं०कृत। अग्निर्हविरं०कृत। सोमो हविरं०कृत। सविता हविरं०कृ
त। सरस्वती हविरं०कृत। इन्द्रो हविरं०कृत। मरुतः स्वतवसो हविरजुषन्ता०कृत। विश्वेदेवाः

स्त॰प॰
५१

5

हविर॰जुषंतां॰कृता द्यावापृथिवी हविर्जुषेतां॰कृतान्देवा आज्यपा॰कृता अग्निर्होत्रेण कृत ।
वाजिनो देवा हविर्जोषयिष्यंते वर्द्धयिष्यंते महो ज्यायः करिष्यंते अस्मामृध्न होत्राणीयामिसाहि ॥
ततो वाजिनयागः ॥ शं नो भवंतु वाजिनः पुरो नुवाक्या । ऊर्ध्वस्तु उपविश्य पानुवषट्कारः । यन्मे
रेत इति भक्षमंत्रः । अथ त्यागाः ॥ इदमग्नये सोमाय सवित्रे सरस्वत्यै पूष्णे मरुद्भ्यः स्वतव ग्नये सोमाय
द्भ्यो विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यां देवेभ्य आज्यपेभ्यः प्रयतमस्तु । इदमग्नये । इदं सोमाय ।
इदं सवित्रे । इदं सरस्वत्यै । इदं पूष्णे । इदं मरुद्भ्यः स्वतवद्भ्यः । इदं विश्वेभ्यो देवेभ्यः । इदं द्यावापृथि
वीभ्यां । इदमग्नये स्विष्टकृते अहिहने । अग्नेः सोमस्य सवितुः सरस्वत्याः पूष्णो मरुतां स्वतवसां राम
विश्वेषां देवानां द्यावापृथिव्योरुज्जिति॰ अग्निः सोमः सविता सरस्वती पूषा मरुतः स्वत ५१
वसो विश्वे देवा द्यावापृथिवी तमपनुदंतु ॥०॥ सूक्तवाके ॥ इदमग्नये सोमायाग्नये सोमाय

सवित्रेसरस्वत्यैपूष्णेमरुद्भ्यःस्वतवद्भ्योविश्वेभ्योदेवेभ्योद्यावापृथिवीभ्यांदेवेभ्यआज्यपेभ्योअ
ग्नयेहोत्राया।इदंवाजिभ्यः।इदमग्नये।ततःश्रेयोवर्जिकादिसमानंब्रह्मचर्यंश्राद्धंधःशयनक्रतुका
लेवाजायापत्न्युपेयात्समस्वहनेकृंतरालव्रतानि।प्रागुक्तमार्गादिसंमंतरालेव्रतानिकुर्यादिति।।
वक्ष्णात्तृषेब्राह्मणपत्नीभवति।। ।वैश्वदेवपर्वसमाप्तं।। ।अथप्राहंवरुणप्रघासाः।अथावणपावा।तत्र
पूर्वस्यांपौर्णमास्यांउद्धरणं।वरुणप्रघासार्थंगार्हपत्यादाहवनीयमुद्धरामि।वरुणप्रघासार्थंगा
र्हपत्याद्दक्षिणाग्निमाहरामि।ततःअग्निन्वाधानं।उत्तरस्यांपौर्णमास्यांप्रथमंप्रवरणं।गोत्रश्च
मुकामुकशर्मण्ड्गोभिर्मिथुनदक्षिणैर्वरुणप्रघासैर्यक्ष्येतत्रमेत्वंब्रह्माभव।एवंसर्वेषां।तत्रप्रथ
मंअग्निप्रणयनं।अथवस।अन्तरेणचात्वालोत्करौप्रपद्यआहवनीयस्योत्तरतउपविश्य।।
अग्निमांप्रणीयमानाभ्यामभिमुखःस्वदंवदेव्याघिपेतितिसृभिःप्रथमां।उपस्थायउत्तरेऽस्यौ

स्त्र० ५२

अनुमंथ नू न्नू यात् । इध्मो साद्यमाने इत्वा याज्यापदे वर्षा अग्ने । विश्वेभिः स्वनीक ॥ सो देहोत ऊस्य लोके ७१
निहोता होतृ षदने वेद न्नः स्यसुनः परस्याइति परिधमनीया । दक्षिणे हवनीयस्य पाविशे पोस्थज्य
ते । वेदी भवतः । द्वावाहवनीयो च । मंथ नादि सर्ववत् । एहि होत रितु क्तो आवग । अंतरेण चात्वा
लोत्करौ प्रविश्य । अग्निर्म्यांसमिध्यमानाभ्यामिति सुक्त । कं प्रपद्या दक्षिणतः आसामिधेन्याः । आवोहेनी
यस्य दित्वात् । अहडव्यते । अग्नी महां तो स्थो ब्रह्मण्यो भारतो । प्रवरनाम । देवेद्धो मान्विता ऋषिष्टु
तो विप्रानुमदितो कविशस्तो ब्रह्मसंशितो घृताहवनो । प्रणीयज्ञानां रथ्या वध्वराणाम तूर्तो हो
तारो तूर्णी हव्यवाहो । आस्पात्रे जुहूर्देवानां चमसो देवपानाः अराँ इवाग्ने नेमी देवांस्त्वं परिभू
सीँ परिभुवे स्थः । आवहतं देवान् यजमानाय । अग्निमग्नी आवहतं । सोममावहतं । अग्निमावह राम
तं । सोममावहतं । सवितारं उपांशु आवहतं । सरस्वतीमावहतं । मषणमावहतं । इंद्राग्नी आव ५२

मेष्स्वाहाग्निं स्वाहा सोमं २ ॥ देवाँ आज्यपाँ आवहतीः ॥ १

तं २

देवाँ आज्यपाँ इत्यादिः इन्नं वरुणमावहतं । मरुत आवहतं । कंउपांसु आवहतं । अग्निं होत्राय । आवहतं । स्वं महिमानमावहतं । आवह जातवेदः सो सुयज्ञा च यजतां नवप्रयाजाः ग्रविहवह । उन्नं मेष्स्वाहाग्निं स्वाहासोमं । स्वाहा सवितारं उपांसु । स्वाहा सरस्वतीं स्वाहा सुष्ठ्यं स्वाहेन्द्राग्नी स्वाहाव रुणं स्वाहा मरुतः । स्वाहा कंउपांसु । स्वाहा देवाँ आज्यपाजुषाणा स्वाहा वाजिनो अग्न आज्यस्य हविषो प्र नु । सर्दनावाज्यभागौ । प्रधानहविषां पोस्मात्याविद्वविदा इन्द्राग्नी अवसा पुरोनुवाक्या । प्र चर्षणि इति याज्या । इममेवरुणपुरोनु । ये ३ यजामहे वरुणं नवाया मिश्र ब्रह्म एणायाज्या । मरुतो यद्धि वो ब लं पुरोनुवाक्या । ये ३ यजामहे मरुतो पूर्षमस्मा नयन याज्या ॥ हिरण्यगर्भः समवर्तताग्रे उपांसु पुरोनुवाक्या । ये ३ यजामहे । कंउपांसु यः प्राणतो निमिषतो याज्या ॥ विराजोस्विष्टकृतः । ये ३ यजामहे ग्निं स्विष्टकृतमया लग्निरग्नेः प्रिया ध्वंसोमस्य प्रिया० लग्नेः प्रिया० सोमस्य प्रिया० स वितुः प्रियाध्स

२ पुरो० मे षो अग्ने० याजों २

रस्वसाः प्रिया ० इन्द्रः प्रिया ० लिंगाग्नेः प्रिया ० वरुणस्य प्रिया ० मरुतां प्रिया ० कस्य उपांशुप्रि
याधमानि देवानामित्यादि । गोमिथुनो दक्षिणा । अस्य वरुणप्रघास पर्वणः समृध्यर्थं गोमिथु
नो दक्षिणा ब्रह्मणे देयः स्फोतिग्म्यः समहस्य प्रदद्दे । रुद्राय त्वेति प्रतिग्रहमंत्रः । को दादित्यनुमंत्र
53 णं । अस्मत्राता । एते वा मध्ये सामिधेनी नाम्ना वर्द्धिष्यां वाच प्यायेथां इत्यादि । ऊहेन सामिधम
नुमंत्र्या न वाऽनुयाजाः सर्वे वत् । अग्निर्हविरंकृत न । सोमो हविरंकृत । अग्निर्हविरंकृत । सोमो
हविरंकृत । सविता हविरंकृत । सरस्वती हविरंकृत । पूषा हविरंकृत । इन्द्राग्नी हविजुषे
तां कृतां । वरुणो हविरंकृत । मरुतो हरस्तुषं तां कृत । कस्य उपांशु कृत । देवा आज्यपां कृत ।
अग्निर्हीत्रेणकृत । वाजिनो हेष्यारित्यादि । सर्ववद्वाजिनयागाः । शंयोर्वाकादि समानं । एकए राम
ववैहोएक एव वदद्विमोकः । न प्रतिप्रस्थानुः । वयस्यागाः ऊनमप्रयाजे इदमग्नयेस्याग्नये ५३

सोमायसवित्रे।सरस्वत्यैपूष्णइंद्राग्निभ्यांवरुणायमरुद्भ्यःकायदेवेभ्यआज्यपेभ्योवाजिना।
भ्यः प्रधानस्य।इदमग्नये।इदंसोमाय।इदंसवित्रे।इदंसरस्वत्यै।इदंपूष्णे।इदमिंद्राग्निभ्यां।इ
दंवरुणाय।इदंमरुद्भ्यः।इदंकाय।इदमग्नयेस्विष्टकृते।बृहते।अग्नेःसोमायसवितुःसरस्व
त्याःपूष्णइंद्राग्न्योवरुणस्यमरुतांकस्योक्रितिं०अग्निःसोमःसवितासरस्वतीपूषेन्द्राग्नी
वरुणोमरुतःकस्तमपनुदंतु॥वाके॥इदमग्नयेसोमायसवित्रेसरस्वत्यैपूष्णइंद्राग्निभ्यां
वरुणायमरुद्भ्यःकायदेवेभ्यआज्यपेभ्योऽग्नयेहोत्राय।इदंवाजिभ्यः।इदमग्नये॥अथावभृथः।
अवभृथमवैतियथासोमइतिवचनात्।नमोवरुणाय।अभिष्ठितःइत्यस्युपारमवधाय।ब्रह्मा
यजमानाहोतावतिष्ठंतःसर्वेवारुण्यानिष्कासेणचरंतिविनुरःप्रयाजाः।बर्हिर्वर्जं।येइ
यजामहेस्वाहाग्निंस्वाहासोमंस्वाहावरुणंस्वाहादेवाइलाहि।वाजिनावाज्यभागौ।विकल्प।

स्त्र०
५४

53

त्। प्रधानस्य अवरुं हिरण्जा वरुण इति पुरोनुवाक्या। ये३ यजामहे वरुणं अन्तं ने राजसूय याज्या। अथ स्वि
ष्टकृत। स त्वं नो अग्ने अवमः इति पुरोनुवाक्या। ये३ यजामहे अग्नीवरुणा त्वं नो अग्ने वरुणस्य विद्वान् या
ज्या। यद्यदनुयाजा भवन्ति। द्वावनुयाजौ। बर्हिर्वर्जं। येन स्त्रियावा कुरुते निमित्तादिना हेना आत्मन्
मूर्द्धन्यभिषिञ्चेत्। वरुणप्रघासः समाप्तः॥ ॥ कार्त्तिक्यां साकमेधाः॥ ॥ आग्रहायण्यां वा। सर्व
स्यां पौर्णमास्यां प्रवर्त्तिते अग्नये अनीकवते अष्टा। तत्र उद्धरणं। अनीकवते सध्यं गार्हपत्याद् उद्ध
नीय उद्धरामि। अनीकवती ध्यं गार्हपत्याद् दक्षिणाग्निमाहरामि। अविद्या भने ब्रह्मवरणं।
गोत्र अमुकामुक शर्मन् ब्रह्मा होता यो दक्षिणस्यानीकवती धमाहं यत्ते। तत्र मेतं ब्रह्मा भव। एवं स
र्वेषां। तत्र कं प्रपद्यादि। सप्तदश सामिधेन्यः। आवाहनं। अग्निमनर्भावह। सोममावह। अग्निमनी
कवन्तमावह। देवां इत्यादि। उत्तमे प्रयाजे। स्वाहाग्निं स्वाहा सोमं। स्वाहाग्निमनीकवन्तं स्वाहा देवां इ

राम
५४

सादि। वार्त्रघ्नावाज्यभागौ। मध्यनस्य। अनीकैर्देवेभ्यो देया कल्पजा। पुरोनुवाक्या। येऽस्य जा महे।
ग्निमनीकवंतं सैनानीके न सुविदत्रोऽस्मे द्वितियाज्या। निसस्विष्टकृतः। येऽस्य आमुहेग्निं स्विष्टकृत
मग्निरग्नेः प्रिया० सोमस्य प्रिया० लग्नेरनीकवतः प्रिया० देवानामिमा दिव्यवोर्हो हविह्लिणा। स्वक्केवा
के। अग्निर्हविरं० कृतं। सोमो हाविरं० कृत। अग्निरनीकवान् हविरं० कृत। देवाइ सादि। अथ स्वगान
उत्तमे प्रयाजे इदमग्नये सोमायाग्नयेनीकवते देवेभ्य आज्यपेभ्यः। मध्यनस्य। इदमग्नयेनीकवते। इ
दमग्नये स्विष्टकृते। अथ होता। अग्नेरनीकवत उक्तिंति० अग्नीरनीकवा स्तमपन्तु हस्तुः। स्वकवाके। इद
मग्नये सोमायाग्नये अनीकवते देवेभ्य आज्यपेभ्योग्नये होत्राय। मध्यन्न काले मरुद्भ्यः सांतपनेभ्यः
दुष्टिः। पुनरुद्धरणं। सांतपनीयेष्ट्यर्थं गार्हपत्या दाहवनीयमुद्धरामि। सांतपनीयेष्ट्यर्थं गार्हपत्या
द्दक्षिणाग्निमाहरामि। अग्निर्वाधानि। ब्रह्मवरणं। गोमिथुनं अमुकामुक शर्मन्नि त्वाहार्यं दक्षि

स्व० लया सांतपनी येष्वाहं पद्दये। तत्र मेत्रे ब्रह्मा भव। कं प्रपद्यादि। समद्दशासामिधेन्यः। आवाहनं। अग्नि
५५ मग्नआवह। सोममावह। देवं मरुतः सांतपनांइत्यादि। उत्तमे प्रयाजे। स्वाहाग्निं स्वाहा सोमं। स्वाहा
मरुतः सांतपनान् स्वाहा देवा इत्यादि। देवधर्म्मं नाकाज्य भागो। व रुत्वात्। प्रधानस्य। सांतपना इदं
55 हविः पुरोनुवाक्या। येरुपजामहे मरुतः सांतपनान् यो नो मरुतो अभियाज्या। निष्टिवष्टकृतः।
येरुपजामहे। अग्निं स्विष्टकृतमय्याल अग्निरग्नेः प्रिया० सोमस्य प्रिया० मरुतां सांतपनानां प्रिया० देवा
नामित्यादि। अवाहाय परिदृश्निणा। सूक्तवाके। अग्निर्हविरं० कृत। सोमो हविरं० कृत। मरुतः सां
तपना हविर्जुषंता० कृत। देवा इत्यादि। अयसागसः। इदमग्नये सोमाय मरुद्भ्यः सांतपनेभ्यो
देवेभ्यो आज्यपेभ्यो। प्रधानस्य। इदं मरुद्भ्यः सांतपनेभ्यः इदमग्नये स्विष्टकृते। अहने। मरुतां राम
सांतपनानामनुज्ञिनि०। मरुतः सांतपना सान्तपनत्वं० सूक्तवाके। इदमग्नये सोमाय मरुद्भ्यः ५५

सांतपनेभ्योदेवेभ्यआज्यभागौ।मध्येहोत्राय।सायमन्नंगृहमेधेभ्योवृष्टिः।अङ्करणाभावः।अग्नि
न्वाधानं।ब्रह्मवरणं।अन्वाहार्यदक्षिणगृहमेधीयेष्ट्यांप्राध्याहंयजाम्ये।तत्त्वमेतंब्रह्माभव।आ
ज्यभागादिलोता।अनन्तरौपहत्याधिकरणे निरूपिताः।निरसनोपवेशनमात्रं भवति।पद्यद्वि
धायुहोतृवरणंकरोति।ततोदेवसवितरेतत्वावृणतइत्यादिमाज्यायचाः।शमभाहुकिदेवाःइत्य
नं।प्रकृतिवत्।वृद्धिमन्तावाज्यभागौ।अग्निनारयिंगयस्फानइति।भक्षनस्या।गृहमेध्यसत्र आग
तपुरोनुवाक्या।येजोयेमइमरुतोगृहमेधास्वपतचुभ्यमवृईरितइतियाज्या।केषांचिदेद्धषूर्णंगृह
मेधिनोदेवता।नत्रगृहमे(धिनोदेवत)यसमन्नुभ्यमवृइति।त्वांविश्वेश्ववसमइति।स्विष्टकृतःपुरो
नुवाक्या।यपजामहेअग्निस्विष्टकृतं।नयद्वाहविषंतदग्रपयाज्या।अन्वाहार्योदक्षिणा।सूक्तवाके।
अग्निहरंकृता।सोमोहविरंकृता।मरुतोहविरंकुर्वन्ता।कृता।देवाआज्यपानभवति।अग्निहोत्रे

गृहमेधा।

56

रोत्पादिन वृति। अथ पत्न्यागाः। इदं मरुद्भ्यो गृहमेधेभ्यः। इदमग्नये स्विष्टकृते। अत्र बर्हिर्नेन त्वनि।
अनुयाज्या नावाहत्। सूक्तवाके। इदं मरुद्भ्यो गृहमेधेभ्यो गृहोत्रायाः प्रातः ... विहोमानंतरं
मरुद्भ्यः क्रीडिभ्य इष्टिः। उद्धरणं। क्रीडिनीयेष्ट्यर्थं गार्हपत्यादाहवनीयमुद्धरणमि। क्रीडिनी
येष्ट्यार्थं हं पत्न्ये। तत्र मेत्वं ब्रह्मणात्वा। कं प्रपद्यादि। सप्तदश सामिधेन्यः। आवाहनं। अग्निमग्न आव
ह। सोममावह। मरुतः क्रीडिन आवह। मरुदेवां इत्यादि। अत्र प्रयाजे। स्वाहाग्निं स्वाहा सोमं स्वा
हा मरुतः क्रीडिनः स्वाहा देवा देवा इत्यादि। वार्त्रघ्नावाज्यभागौ प्रधाने स्य क्रीडिवः ... मारुतं धु
रोनुवाक्या। ये यजामहे मरुतः क्रीडिनः पर्वतश्चिन्महि ... इति याज्या। नित्य स्विष्टकृतः। ये य
जामहे अग्निं स्विष्टकृतमयाडग्निरग्नेः प्रिया धा॰ सोमस्य प्रिया धा॰ मरुतां क्रीडिनां प्रिया धा॰ देवानामित्यादि राम
अवाहायेदहिणा। सूक्तवाके। अग्निरिदं हविरजुषत। सोमो इदं हविरजुषत। मरुतः क्रीडिनो हविरजुषत्। ५६

षंताः॰ कृतं। देवा इत्यादि। अथ यागाः। तत्र मेयाजे। इदमग्नये सोमाय मरुद्भ्यः क्रीलिभ्यो देवे
भ्य आज्यपेभ्यः। प्रधानस्य। इदं मरुद्भ्यः क्रीलिभ्यः इदमग्नये स्विष्टकृते। व्रूहनि॥ मरुतां क्रीलिनामु
ज्जितिः। मरुद्भ्यः क्रीलिनस्तमपनुदंतु। स्तकवाके। इदमग्नये सोमाय मरुद्भ्यः क्रीलिभ्यो देवेभ्य
आज्यपेभ्यो ऽग्नये होत्राय॥ ॥ अथ महाहविरिष्टिः। तत्र उद्धरणं। महाहविरिष्ट्यर्थं गार्हपत्यादा
हवनीयामुद्धरामि। महाहविरिष्ट्यर्थं गार्हपत्याद्दक्षिणाग्निमाहरामि। अग्निं वाधानं। ब्रह्मवर
णं। ऋषभं दक्षिणया महाहविषा इष्टये। तत्र मेतं ब्रह्मा भव। अग्निप्रणयनं। आसन्नेषु अग्निमं
थनं। एहि होतरिसुक्के आवम्य। वाता लोकान्रे प्रविश्य। कं प्रपद्यादि समप्रदक्षगता मिधेन्यः। आवा
हनं। अग्निमग्न आवह। सोममावह। अग्निमावह। सोममावह। अग्निमावह। सोममावह। सवितारं
उपांशु। आवह। सरस्वतीमावह। इन्द्राग्नी आवह। महेन्द्रमावह। विश्वकर्माणं उपांशु आवह। देवां

स्मृ०
५७

इत्यादि। नवप्रयाजाः। स्वाहाग्निं स्वाहासोमं। स्वाहाग्निं स्वाहासोमं। स्वाहासवितारं। स्वाहासर
स्वतीं। स्वाहापूषणं स्वाहेन्द्राग्नी स्वाहा महेन्द्रं। स्वाहा विश्वकर्माणं। स्वाहा देवा इत्यादि। सर्वत्राव
ज्यभागौ। अथ मैकान हविषां। ऐन्द्राग्नानामांयाज्यापुरोनुवाक्याः सर्व वृत्तामहां इन्द्रो यत्तुं जसतिम
हेन्द्रस्य पुरोनुवाक्या। येऽ३यजामहे महां इन्द्रो न्द्र वद्धितियाज्या। वाचस्पति विश्वकर्माणं पुरोनुवाक्या।
येऽ३यजामहे विश्वकर्माणं यातेधामानि परमाणीति याज्या। विराजो स्विष्टकृतः येऽ३यजामहेग्नि
स्विष्टकृतमयाळग्निरग्नेः प्रिया० सोमस्य प्रिया० अग्नेः प्रिया० सोमस्य प्रिया० सवितुः प्रिया० देवाना
मित्यादि। इमो अग्न इति याज्या। वृषभो दक्षिणा। अस्य महाहविरिष्टेः समृध्यर्थं वृषभो दक्षिणा
ब्रह्मादिभ्य ऋत्विग्भ्यः स्तम हं संप्रददे। रुद्राय वेति प्रतिग्रहमंत्रः। को दादित्यनुमंत्रणं। अस्मात् ता। स्मृ
नवानुयाजाः। पूर्ववत्। सूक्तवा। अथेन्द्रः सोमस्य सरस्वत्याः इन्द्राग्न्योर्महेन्द्रस्य विश्वकर्मणः ५७

ज्कितिं। अग्निः सोमः सविता सरस्वती पूष्णेन्द्राग्नी महेन्द्रो विश्वकर्मा तमपनुदन्तुं स्रुक्कवाके। अ
ग्निर्हविरकृत। सोमो हविरकृत। अग्निर्हविरंकृत। सोमो हविरंकृत। सविता हविरकृत। सर
स्वती हविरंकृत। पूषा हविरंकृत। इन्द्राग्नी हविर्जुषेतां कान्तां। महेन्द्रो हविरकृत। विश्वकर्मा
हविरंकृत। देवा आज्यपा जुषाणा इह वाजिनं नावभृथो भवति। अथ स्तागाः। इदमग्नये सोमाय
ये सोमाय सवित्रे सरस्वत्यै पूष्ण इन्द्राग्निभ्यां महेन्द्राय विश्वकर्मणे देवेभ्य आज्यपेभ्यः। प्रधानस्य।
इदमग्नये। इदं सोमाय। इदं सवित्रे। इदं सवित्रे। इदं सरस्वत्यै। इदं पूष्णे। इदमग्निभ्यां। इदं महेन्द्राय। इ
दं विश्वकर्मणे। स्रुक्कवाके। इदमग्नये सोमाय सवित्रे सरस्वत्यै पूष्ण इन्द्राग्निभ्यां। महेन्द्राय विश्वक
र्मणे देवेभ्य आज्यपेभ्यो ग्नये होत्राय। अपराह्णे पित्र्या विहविरिष्टिः। अथ मा वेद्युक्त रावंतरेण प
तिपद्य। अग्रेण महाहविषिं वेदिं गत्वा पित्र्या वेदिं प्रणीतोत्तरावंतरेण प्रविश्य उत्तरतो दक्षिणामु

